संस्कृतवार्ता:

24.09.2024

सायम् - 06:20

मुख्यवार्ता:

· प्रधानमन्त्री नरेन्द्रमोदी अमेरिकायाः त्रिदिवसीयां सफलयात्रां समाप्य नवदिल्लीं प्रति प्रस्थितः। यात्रावधौ तेन नैकैः नेतृभिः समं द्विपक्षीया चर्चा समनुष्ठिता। सः क्वाड्नेतृणां सम्मेलनेन सार्धं भारतीय- अमेरिकादेशीयस्य समुदायस्य कार्यक्रमेऽपि सम्मिलितोऽभवत् । तेन प्रमुख - अमेरिकादेशीयैः उद्यमिभिः सममपि चर्चा कृता।

· राष्ट्रपतिः अद्य नव-दिल्ल्यां सर्वोच्च - लेखा-संस्थानानां एशियाई संघठनस्य षोडशीं सभां उद्घाट्यन्ती प्रोक्तवती यत् सार्वजनिक - क्षेत्रस्य लेखा-परीक्षणस्य अधिकारः - पारम्परिक - लेखा - परिक्षणात् अग्रे वर्धितोऽस्ति ।

· जम्मूकश्मीर-विधानसभानिर्वाचनस्य श्वस्तनीयाय द्वितीयचरणीय मतदानाय सर्वविधसज्जाः सन्ति विहिताः ।

· एनपीपी इति दलस्य सांसदः डॉ. हरिनी- अमरसूर्या इत्यनेन श्रीलंका-देशस्य प्रधानमन्त्री - रूपेण शपथवचनं स्वीकृतम्।

प्रधानमन्त्री / प्रत्यावर्तनम्

प्रधानमन्त्री नरेन्द्रमोदी अमेरिकायाः त्रिदिवसीयायाः सफलयात्रायाः अनन्तरं नवदिल्लीं प्रति प्रस्थितः। यात्रावधौ तेन नैकैः नेतृभिः समं द्विपक्षीया चर्चा समनुष्ठिता। सः क्वाड्नेतृणां सम्मेलनेन सार्धं भारतीय- अमेरिकादेशीयस्य समुदायस्य कार्यक्रमेऽपि सम्मिलितोऽभवत् । तेन प्रमुख - अमेरिकादेशीयैः उद्यमिभिः सममपि चर्चा कृता। अस्मिन् यात्रावसरे तेन संयुक्तराष्टर् शिखर सम्मेलनमपि सम्बोधितम् । श्रीमोदिना यात्रारम्भः अमेरिकादेशस्य राष्ट्रपतिना जो-बाइडेन इत्यमुना सह कृतोपवेशनात् समारब्धः। उपवेशनेऽस्मिन् ययोः सन्धिपत्रद्वयोः उपरि हस्ताक्षरम् कृतम् तौ स्तः हिन्द- प्राशान्तिक - आर्थिक संरचना सन्धिः, भारत-अमेरिका- औषधविधि संरचना च। उल्लेखनीयमस्ति यत् क्वाड् नेतृभिः हिन्दमहासागरीय नेतृत्वाय प्रधानमन्त्रीमोदिनः भारतस्य च प्रशंसा कृता। क्वाड् इत्यस्य उद्देशानां संवर्धनाय क्वाड्-नेतृभिः क्वाड्-विलमिंगटन- घोषणा इत्येषाऽपि अङ्गीकृता । शिखर सम्मेलनावसरे प्रधानमन्त्रिणा मोदिना जापानदेशस्य

प्रधानमन्त्रिणा फुमियो - किशिदा अथ ऑस्ट्रेलियादेशस्य च प्रधानमन्त्रिणा एंथनी अल्बानीज इत्यनेन सह द्विपक्षीयोपवेशने विहिते। प्रधानमन्त्रिणः यात्रायाः प्रमुखाकर्षणेषु एकमासीत् अमेरिकादेशेन सप्तनवति-अधिक-द्विशत-संख्याकानाम् पुरावशेषाणां प्रत्यावर्तनम्।

<u>राष्ट्रपति : प्रौद्योगिकी</u>

राष्ट्रपतिः द्रौपदी-मुर्मुः बलं दत्वा उक्तवती यत् प्रभावी-लेखा - परीक्षण - कार्याणां कृते प्रौद्योगिक्याः विकासः महत्त्वपूर्णः अस्ति । राष्ट्रपतिः अद्य नव-दिल्ल्यां सर्वोच्च - लेखा-संस्थानानां एशियाई संघठनस्य षोडशीं सभां उद्घाट्यन्ती प्रोक्तवती यत् सार्वजनिक - क्षेत्रस्य लेखा-परीक्षणस्य अधिकारः - पारम्परिक - लेखा - परिक्षणात् अग्रे वर्धितोऽस्ति ।

सा प्रोक्तवती यत् प्रौद्योगिकी-संचालिते विश्वस्मिन् प्रौद्योगिक्या: उपयोगं कृत्वा अधिकाधिक-रूपेण सार्वजनिक सेवाभ्य: द्रुतता प्रदीयते। राष्ट्रपति: मुर्मु: प्रोक्तवती यत् अधुना विश्वस्मिन् एका महत्वपूर्णा स्थिति: अस्ति, यत्र कृत्रिम-बुद्धिमत्ता, डेटा-एनालिटिक्स, इत्यादीनां वृद्धि: सर्वत्र दरीदृश्यते आंकिकीया च उद्यमिता सर्वत्र प्रतिभाति ।

<u>जम्मू-कश्मीर निर्वाचनम्</u>

जम्मूकश्मीर विधानसभानिर्वाचनस्य द्वितीय चरणाय सर्वविधसज्जाः सन्ति विहिताः । चरणेऽस्मिन् षड्-जनपदानां षड्विंशतिः विधानसभासनेभ्यः मतदानानि श्वः भविष्यन्ति । एतेषां जनपदानां अष्टसप्ततिसहस्राधिक- पञ्चविंशतिलक्षमतदातारः एकोनचत्वारिंशदधिक-द्विशत-प्रत्याशिनां भाग्यस्य निर्णयं करिष्यन्ति। एतेषु प्राक्तनः मुख्यमन्त्री उमर-अब्दुल्ला, प्रदेश कांग्रेसदलप्रमुख: तारिक- हामिद-कर्रा अपनी-पार्टीति दलस्य प्रमुखः अल्ताफ- बुखारी च प्रमुखभूताः सन्ति। मतदानाय आहत्य सार्धत्रिसहस्राधिक मतदान-केन्द्राणि निर्मितानि सन्ति । अस्मै मतदानाय प्रचाराभियानं ह्यः संध्यायामेव समाप्तम् । केन्द्रशासित प्रदेशेऽस्मिन् मतदानानि त्रिषु चरणेषु जायन्ते। मतगणना च अक्टूबरमासस्य अष्टमे दिनाङ्के भविता ।

<u>झारखण्ड- निर्वाचन आयोग</u>

मुख्य-निर्वाचन-आयुक्तः राजीवकुमारः निर्वाचन-आयुक्ताभ्यां ज्ञानेश-कुमार तथा सुखबीरसिंह-सन्धु इत्येताभ्यां सह अद्य राञ्ची-नगरे सर्वेषां विभागानां आयुक्तैः, क्षेत्रीय-महानिदेशकै:, सर्वेषां मण्डलानां मण्डल-निर्वाचन-अधिकारिभिः, सर्वै: उपमहानिदेशकै:, सर्वै: झारखण्ड -राज्यस्य

आरक्षि-अधीक्षकैः च सह समीक्षा-उपवेशनम् अकरोत्। पूर्वं आयोगः केन्द्रस्य राज्यस्य च प्रवर्तन-संस्थाभ्य: प्रलोभन-मुक्तं निर्वाचनं सुनिश्चितं कर्तुं निर्देशं दत्तवान्। आयोगेन राज्यस्य मुख्य-निर्वाचन-अधिकारिणः, राज्य-आरक्षक-नोडल्-इति अधिकारिणः, केन्द्रीय-सशस्त्र-आरक्षक-बलानां नोडल् इति अधिकारिणः च राज्ये विधानसभा-निर्वाचनस्य सुकरं शान्तियुतं च सञ्चालनाय निर्दिष्टा:।

<u>कर्णाटका / मुख्यमन्त्री</u>

कर्नाटका - उच्च न्यायलयेन मुडा-भूमि- आवंटनेति प्रकरणे मुख्यमन्त्रिणं विरुध्य 'राज्यपाल-अनुमोदित-विधिप्रकरणं निरस्तम् । न्यायमूर्तिन: एम. नागप्रसन्ना इत्यस्य एकलपीठेन उक्तं यत् राज्यपाल: स्वतन्त्रनिर्णये सक्षमः अस्ति, अथ च मुख्यमन्त्रिणं विरुध्य कृतादेशेऽपि तस्य विवेकहीनता न प्रतिभातीति ।

<u>एस. जयशंकर द्विपक्षीयोपवेशनम्</u>

विदेशमन्त्री सुब्रह्मण्यम्-जयशंकर: अद्य न्यूयार्कनगरे संयुक्तराष्ट्र- महासभायाः उपवेशनावसरे बांग्लादेशस्य विदेशप्रकरणानां परामर्शकेण तौहीद-हुसैन इत्यनेन सह द्विपक्षीयोपवेशनम् अकरोत्। उपवेशनमिदं शेखहसीनायाः पदच्युतानन्तरं मुहम्मद - युनूस इत्यस्य च कार्यकारी शासनानन्तरं प्रथमम् उच्चस्तरीयोपवेशनमस्ति। उपवेशनेऽस्मिन् उभयोः परिवेशिदेशयोः द्विपक्षीयविषयाः पारस्परिकहिताधारित-प्रकरणानि च चर्चितानि ।

<u>श्रीलंका प्रधानमन्त्री</u>

एनपीपी इति दलस्य सांसदः डॉ. हरिनी- अमरसूर्या इत्यनेन श्रीलंका-देशस्य प्रधानमन्त्री - रूपेण शपथवचनं स्वीकृतम्। डॉ. अमरसूर्या अद्य अपराह्ले राष्ट्रपति - सचिवालये राष्ट्रपति: अनुरा - कुमार – दिसानायकस्य समक्षं शपथवचनं स्वीकृतवान्। दिवसैक पूर्वं श्री दिसानायकेन स्वयं राष्ट्रपति-रूपेण शपथं स्वीकृतम् आसीत्। एनपीपी इति दलस्य सांसद: विजित-होराथ: लक्ष्मण-निपुण - अराची च मन्त्रिमण्लस्य मन्त्री रूपेण शपथं स्वीकृतवन्तौ ।

वित्तमन्त्रिण: उज्बेकिस्तान यात्रा

वित्तमन्त्री निर्मलासीतारामन् इत्येषा अद्यारभ्य उज्बेकिस्तानदेशस्य पञ्चदिवसीययात्रायाम् अस्ति। स्वीययात्राकाले वित्तमन्त्री श्व: गुरूवासरे च समरकन्दस्थले एशिया-आधारभूतसंरचना-निवेश-बैंक-इत्येतस्य बोर्ड-ऑफ-गवर्नर्स-इत्यस्य नवमे वार्षिकोपवेशने भागं भजिष्यति। अपि च भारत-उज्बेकिस्तानयोर्मध्ये द्विपक्षीय-निवेशसन्धिपत्रेषु हस्ताक्षरं करिष्यति। वित्तमन्त्री उज्बेकिस्तान-कतर-चीन-देशानां स्वीयै: समकक्षै: सह द्विपक्षीयोपवेशनानि विधास्यति। तदनु सुश्रीसीतारामन् इत्येषा उज्बेकिस्तानस्य राष्ट्रपतिना शावकत-मिर्जियोवेवेन सह मेलनं करिष्यति इति आशास्यते।

।।इति वार्ता:।।